ओम् सह नाववतु सह नौ भुनक्तु |
सह वीर्यं करवावहै | तेजस्विनावधीतमस्तु मा विद्विषावहै
ओम् शान्तिः   शान्तिः   शान्तिः ||

पिताऽसि लोकस्य चराचरस्य त्वमस्य पूज्यश्च गुरुर्गरीयान् |
न त्वत्समोऽस्त्यभ्यधिकः कुतोऽन्यो लोकत्रयेऽप्य प्रतिम प्रभाव ||

तस्मात् प्रणम्य प्रणिधाय कायं प्रसादये त्वामहमीशमीड्यम् ।
पितेव पुत्रस्य सखेव सख्युः प्रिय: प्रियायार्हसि देव सोढुम् ||

ओम् असतो मा सद्गमय
तमसो मा ज्योतिर्गमय |
मृत्योर्माऽमृतं गमय
शान्ति: शान्ति: शान्ति: ||

स्थापकाय च धर्मस्य सर्वधर्मस्वरूपिणे |
अवतारवरिष्ठाय रामकृष्णाय ते नम: ||

जननीं शारदां  देवीं रामकृष्णं जगद्गुरुम् |
पादपद्मे तयो: श्रृत्वा प्रणमामि मुहुर्मुहु: ||

नम: श्रीयतिराजाय विवेकानन्दसूरये |
सच्चित् सुखस्वरूपाय स्वामिने तापहारिणे ||